नामांकाः Roll No.

No. of Questions – **30**

P-95-Sanskritam – I

No. of Printed Pages – **4**

प्रवेशिका परीक्षा, 2018

संस्कृतम्

(प्रथम–प्रश्नपत्रम्)

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) **सर्वे** प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. "विरामोऽवसानम्" इति सूत्रेण का संज्ञा भवति ? **1**

2. "रमे" इत्यत्र "औ" स्थाने "शी" आदेशः केन सूत्रेण भवति ? **1**

3. "इदु द्भ्याम्" इति सूत्रस्यार्थो लेख्यः । **1**

4. "ज्ञानानि" इत्यत्र शेः सर्वनामस्थानसंज्ञा केन सूत्रेण भवति ? **1**

5. "इयम्" इत्यत्र दकारस्य यकारः केन सूत्रेण भवति ? **1**

6. "यः सौ" इति सूत्रस्यार्थो लेख्यः । **1**

7. "अजा" इति प्रयोगे टाप् विधायकं सूत्रं लिखत । **1**

8. "उगितश्च" इति सूत्रेण कः प्रत्ययः भवति ? **1**

9. यथेच्छं एकपदस्य संस्कृतेन वाक्यप्रयोगं कुरूत । **1**
   प्रातर् , पृथक् , चिरम्

10. वद् धातु – लट् लकार – प्रथम पुरुष – एकवचनं लिखत । **1**

11. "रामेण" इत्यत्र टा स्थाने 'इन' आदेशः केन सूत्रेण भवति ? **2**

12. "याडापः" इति सूत्रस्य सोदाहरणमर्थो लेख्यः । **2**

13. "नपुंसकाच्च" इति सूत्रस्यार्थो लेख्यः । **2**

14. लिट् इत्यत्र हस्य ढकारः केन सूत्रेण भवति ? **2**

15. "नहो धः" इति सूत्रस्य सोदाहरणमर्थो लेख्यः । **2**

16. "अहन्" इति सूत्रस्यार्थो लेख्यः । **2**

17. अधोलिखितेषु द्वयोः अर्थः लेख्यः । **1 + 1 = 2**

सहसा, शनैः, अन्तरेण, नाना

18. निम्नलिखित – अव्ययेषु द्वयोः अर्थः लेख्यः । **1 + 1 = 2**

पुरा, चेत्, इव, संवत्

19. भू धातोः लट्लकारस्य रूपाणि लेखनीयानि । **2**

20. वद् धातोः लोट्लकारस्य प्रथमपुरुषस्य रूपाणि लिखत । **2**

21. "सर्वादीनि सर्वनामानि" इति सूत्रस्य सोदाहरणं व्याख्या कार्या । **4**

22. निम्नाङ्कितेषु रूपद्वयं सम्यक् साधयत । **4**

रमया, सर्वस्याः, मत्यै, स्त्रियः

23. अधोलिखितेषु रूपद्वयं सम्यक् साधयत । **4**

ज्ञानेन, वारिणी, प्ररि, सुधिनी

24. निम्नाङ्कितेषु रूपद्वयं सम्यक् साधयत । **4**

उपानत्, चतस्रः, गीः, अद्भिः

25. अधोलिखितेषु रूपद्वयं साधयत । **4**

बाला, नर्तकी, त्रिलोकी, बह्वी

26. "पुंयोगादाख्यायाम्" इति सूत्रस्य सोदाहरणं व्याख्या कार्या । **4**

27. "दादेर्धातोर्घः" "अनिदितां हल उपधाया क्ङिति" वा सूत्रैकस्य सोदाहरणं व्याख्या कार्या । **5**

28. निम्नाङ्कितेषु रूपद्वयं सम्यक् साधयत । **2 ½ + 2½ = 5**

कानि, दण्डीनि, एते, पयांसि

29. अधोलिखितेषु चत्वारि रूपाणि साधनीयानि । **2 + 2 + 2 + 2 = 8**

रामान्, सर्वस्मै, हरिः, सखा, विश्वपाः गौः, धाता

30. निम्नलिखितेषु प्रयोगेषु चत्वारः प्रयोगाः साधनीयाः । **2 + 2 + 2 + 2 = 8**

लिट्, चक्षु, इमे, राजा, वृत्रघ्नः, अस्मान्, युष्माकम्, असौ
